॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ११

सुमाली वरलब्धांस्तु ज्ञात्वा तान्वै निशाचरान् ।
उदतिष्ठद्भयं त्यक्त्वा सानुगः स रसातलात् ॥ १॥

मारीचश्च प्रहस्तश्च विरूपाक्षो महोदरः ।
उदतिष्ठन्सुसंरब्धाः सचिवास्तस्य रक्षसः ॥ २॥

सुमाली चैव तैः सर्वैर्वृतो राक्षसपुङ्गवैः ।
अभिगम्य दशग्रीवं परिष्वज्येदमब्रवीत् ॥ ३॥

दिष्ट्या ते पुत्रसम्प्राप्तश्चिन्तितोऽयम् मनोरथः ।
यस्त्वं त्रिभुवणश्रेष्ठाल्लब्धवान्वरमीदृशम् ॥ ४॥

यत्कृते च वयं लङ्कां त्यक्त्वा याता रसातलम् ।
तन्नतं नो महाबाहो महद्विष्णुकृतं भयम् ॥ ५॥

असकृत्तेन भग्ना हि परित्यज्य स्वमालयम् ।
विद्रुताः सहिताः सर्वे प्रविष्टाः स्म रसातलम् ॥ ६॥

अस्मदीया च लङ्केयं नगरी राक्षसोषिता ।
निवेशिता तव भ्रात्रा धनाध्यक्षेण धीमता ॥ ७॥

यदि नामात्र शक्यं स्यात्साम्ना दानेन वानघ ।
तरसा वा महाबाहो प्रत्यानेतुं कृतं भवेत् ॥ ८॥

त्वं च लङ्केश्वरस्तात भविष्यसि न संशयः ।
सर्वेषां नः प्रभुश्चैव भविष्यसि महाबल ॥ ९॥

अथाब्रवीद्दशग्रीवो मातामहमुपस्थितम् ।
वित्तेशो गुरुरस्माकं नार्हस्येवं प्रभाषितुम् ॥ १०॥

उक्तवन्तं तथा वाक्यं दशग्रीवं निशाचरः ।
प्रहस्तः प्रश्रितं वाक्यमिदमाह सकारणम् ॥ ११॥

दशग्रीव महाबाहो नार्हस्त्वं वक्तुमीदृशम् ।
सौभ्रात्रं नास्ति शूराणां शृणु चेदं वचो मम ॥ १२॥

अदितिश्च दितिश् चैव भगिन्यौ सहिते किल ।
भार्ये परमरूपिण्यौ कश्यपस्य प्रजापतेः ॥ १३॥

अदितिर्जनयामास देवांस्त्रिभुवणेश्वरान् ।
दितिस्त्वजनयद्दैत्यान्कश्यपस्यात्मसम्भवान् ॥ १४॥

दैत्यानां किल धर्मज्ञ पुरेयं सवनार्णवा ।
सपर्वता मही वीर तेऽभवन्प्रभविष्णवः ॥ १५॥

निहत्य तांस्तु समरे विष्णुना प्रभविष्णुना ।
देवानां वशमानीतं त्रैलोक्यमिदमव्ययम् ॥ १६॥

नैतदेको भवानेव करिष्यति विपर्ययम् ।
सुरैराचरितं पूर्वं कुरुष्वैतद्वचो मम ॥ १७॥

एवमुक्तो दशग्रीवः प्रहस्तेन दुरात्मना ।
चिन्तयित्वा मुहूर्तं वै बाढमित्येव सोऽब्रवीत् ॥ १८॥

स तु तेनैव हर्षेण तस्मिन्नहनि वीर्यवान् ।
वनं गतो दशग्रीवः सह तैः क्षणदाचरैः ॥ १९॥

त्रिकूटस्थः स तु तदा दशग्रीवो निशाचरः ।
प्रेषयामास दौत्येन प्रहस्तं वाक्यकोविदम् ॥ २०॥

प्रहस्त शीघ्रं गत्वा त्वं ब्रूहि नैरृतपुङ्गवम् ।
वचनान्मम वित्तेशं सामपूर्वमिदं वचः ॥ २१॥

इयं लङ्का पुरी राजन्राक्षसानां महात्मनाम् ।
त्वया निवेशिता सौम्य नैतद्युक्तं तवानघ ॥ २२॥

तद्भवान्यदि साम्नैतां दद्यादतुलविक्रम ।
कृत्वा भवेन्मम प्रीतिर्धर्मश्चैवानुपालितः ॥ २३॥

इत्युक्तः स तदा गत्वा प्रहस्तो वाक्यकोविदः ।
दशग्रीववचः सर्वं वित्तेशाय न्यवेदयत् ॥ २४॥

प्रहस्तादपि संश्रुत्य देवो वैश्वारणो वचः ।
प्रत्युवाच प्रहस्तं तं वाक्यं वाक्यविशारदः ॥ २५॥

ब्रूहि गच्छ दशग्रीवं पुरी राज्यं च यन्मम ।

तवाप्येतन्महाबाहो भुङ्क्ष्वैतद्धृतकण्टकम् ॥ २६ ॥

सर्वं कर्तास्मि भद्रं ते राक्षसेश वचोऽचिरात् ।
किं तु तावत्प्रतीक्षस्व पितुर्यावन्निवेदय ॥ २७ ॥

एवमुक्त्वा धनाध्यक्षो जगाम पितुरन्तिकम् ।
अभिवाद्य गुरुं प्राह रावणस्य यदीप्सितम् ॥ २८ ॥

एष तात दशग्रीवो दूतं प्रेषितवान्मम ।
दीयतां नगरी लङ्का पूर्वं रक्षोगणोषिता ।
मयात्र यदनुष्ठेयं तन्ममाचक्ष्व सुव्रतः ॥ २९ ॥

ब्रह्मर्षिस्त्वेवमुक्तोऽसौ विश्रवा मुनिपुङ्गवः ।
उवाच धनदं वाक्यं शृणु पुत्रो वचो मम ॥ ३० ॥

दशग्रीवो महाबाहुरुक्तवान्मम संनिधौ ।
मया निर्भर्त्सितश्चासीद्बहुधोक्तः सुदुर्मतिः ॥ ३१ ॥

स क्रोधेन मया चोक्तौ ध्वंसस्वेति पुनः पुनः ।
श्रेयोऽभियुक्तं धर्म्यं च शृणु पुत्र वचो मम ॥ ३२ ॥

वरप्रदानसंमूढो मान्यामान्यं सुदुर्मतिः ।
न वेत्ति मम शापाच्च प्रकृतिं दारुणं गतः ॥ ३३ ॥

तस्माद्गच्छ महाबाहो कैलासं धरणीधरम् ।
निवेशय निवासार्थं त्वज लङ्कां सहानुगः ॥ ३४ ॥

तत्र मन्दाकिनी रम्या नदीनां प्रवरा नदी ।
काञ्चनैः सूर्यसङ्काशैः पङ्कजैः संवृतोदका ॥ ३५ ॥

न हि क्षमं त्वया तेन वैरं धनदरक्षसा ।
जानीषे हि यथानेन लब्धः परमको वरः ॥ ३६ ॥

एवमुक्तो गृहीत्वा तु तद्वचः पितृगौरवात् ।
सदार पौरः सामात्यः सवाहनधनो गतः ॥ ३७ ॥

प्रहस्तस्तु दशग्रीवं गत्वा सर्वं न्यवेदयत् ।
शून्या सा नगरी लङ्का त्रिंशद्योजनमायता ।
प्रविश्य तां सहास्माभिः स्वधर्मं तत्र पालय ॥ ३८ ॥

एवमुक्तः प्रहस्तेन रावणो राक्षसस्तदा ।
विवेश नगरीं लङ्कां सभ्राता सबलानुगः ॥ ३९ ॥

स चाभिषिक्तः क्षणदाचरैस्तदा
निवेशयामास पुरीं दशाननः ।
निकामपूर्णा च बभूव सा पुरी
निशाचरैर्नीलबलाहकोपमैः ॥ ४० ॥

धनेश्वरस्त्वथ पितृवाक्यगौरवान्
न्यवेशयच्छशिविमले गिरौ पुरीम् ।
स्वलङ्कृतैर्भवनवरैर्विभूषितां
पुरन्दरस्येव तदामरावतीम् ॥ ४१ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com